# Shivavidyakathanam Shivavidyaprashnah

# શિવવિદ્યાકથનં શિવવિદ્યાપ્રશ્નઃ

## Document Information

Text title : Shivavidyakathanam Shivavidyaprashnah

File name : shivavidyAkathanaMshivavidyAprashnaH.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 2| 1-14 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# શિવવિદ્યાકથનં શિવવિદ્યાપ્રશ્નઃ

શિવવિદ્યા મહાવિદ્યા સા વિદ્યા મુક્તિદાયિની ।
તાં વિદ્યાં વેદ વેદો વા ગૌરી વા શઙ્કરોઽથવા ॥ ૧॥

કુમારો વા ગણેશો વા નન્દિકેશોઽપિ વા સ્વયમ્ ।
યદિ સ્યાદ્ગિરિજાકાન્તે ભક્તિરવ્યભિચારિણી ॥ ૨॥

તદૈવ શિવવિદ્યાયાઃ સ્વરૂપપ્રવણો ભવેત્ ।
ભક્તિરીશે તથા તાવત્ ન કસ્યાપ્યદ્ભુતં તપઃ ॥ ૩॥

શિવવિદ્યાપ્રભાવજ્ઞો દુર્લભો ભૂતલે મુને ।
યથા ભક્તિર્મહાદેવે તવ સા તપસા ખલુ ॥ ૪॥

તથાઽદ્યાપિ ન દૃષ્ટૈવ ભક્તિરવ્યભિચારિણી ।
ભક્તિરત્નતયા ખ્યાતા સૈવ ભક્તિર્મહેશ્વરે ॥ ૫॥

સા ભક્તિર્મુક્તિદા નૃણાં સંસારભયમોચિની ।
મહાદેવશ્ચિદાકારઃ પરમાનન્દવિગ્રહઃ ॥ ૬॥

નિર્ગુણોઽપીતિ નિર્ણીતઃ પાર્વતીપતિરિત્યપિ ।
ચન્દ્રચૂડ ઇતિ ખ્યાતઃ ત્રિપુરાન્તક ઇત્યપિ ॥ ૭॥

સ્મરારિરિતિ વિખ્યાતઃ કાલકણ્ઠ ઇતિ સ્મૃતઃ ।
ત્રિશૂલપાણિઃ સર્વેશો જટામણ્ડલમણ્ડિતઃ ॥ ૮॥

ઉમાર્ધવિગ્રહત્વેન પ્રખ્યાતઃ પરમેશ્વરઃ ।
અન્ધકારિરિતિ ખ્યાતો વૃષભધ્વજ ઇત્યપિ ॥ ૯॥

લિઙ્ગાકાર ઇતિ ખ્યાતો ભસ્મોદ્ધૂલિતવિગ્રહઃ ।
રુદ્રાક્ષભૂષણઃ શાન્તો નીલકણ્ઠ ઇતિ સ્મૃતઃ ॥ ૧૦॥

વિરૂપાક્ષ ઇતિ ખ્યાતો દક્ષો દાક્ષાયણીપ્રિયઃ ।
કુમારગુરુરવ્યક્તો વ્યક્તઃ સુન્દરવિગ્રહઃ ॥ ૧૧॥

કામારિરિતિ વિખ્યાતઃ કામદત્વેન કીર્તિતઃ ।
અક્ષરત્વેન વિજ્ઞાતો વિજ્ઞાનાનન્દસાગરઃ ॥ ૧૨॥

ઈશ્વરઃ પરમાત્મા ચ પરમાત્મા પરાત્પરઃ ।
ઇત્યન્યોન્યં વિરુદ્ધં હિ નામ સર્વે ચિદાત્મકે ॥ ૧૩॥

ચિદ્વિલાસ ઇતિ ખ્યાતં ચિદિત્યપિ વિશેષતઃ ।
ઇદં સર્વં વદાસ્મભ્યં શિવધર્માન્ વિશેષતઃ ॥ ૧૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવવિદ્યાકથનં / શિવવિદ્યાપ્રશ્નઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨। ૧-૧૪ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 2. 1-14 ..

Proofread by Ruma Dewan

*Shivavidyakathanam Shivavidyaprashnah*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*